चन्द्रापीड़ं मृत्युजितं स्फाटिकं सर्व्वकामदम्।
मूलाख्यमणिजं शत्रुक्षयार्थं मौक्तिकं तथा ॥
आपत्यं हीरकं ज्ञेयं रोगघ्नमौक्तिकोद्भवम्।
ग्रहभक्तत् पुष्कलं तीर्थं वैदूर्य्यं शत्रुदर्पहृत्।
नीलं लक्ष्मीप्रदं ज्ञेयं स्फाटिकं सर्व्वकामदम् ॥"
इति सारसंग्रहः ॥
"महामुक्तिप्रदं हैमं राजतं भूतिवर्द्धनम्।
आरकूटं तथा कांस्यं शृणु सामान्यमुक्तिदम् ॥
त्रपुसीसायसं लिङ्गं शत्रूणां नाशने हितम्।
कीर्त्तिदं कांस्यजं लिङ्गं राजतं पुत्त्रवर्द्धनम् ॥
पैत्तलं भुक्तिमुक्त्यर्थं मिश्रजं सर्व्वसिद्धिदम् ॥"
इति कालोत्तरतन्त्रम् ॥
तत्रैव शिवनारदसंवादे ।
"पितॄणां मुक्तये लिङ्गं पूज्यं रजतसम्भवम्।
हैमजं सत्यलोकस्य प्राप्तये पूजयेत् पुमान्।
पूजयेत्ताम्रजं लिङ्गं पुष्टिकामो हि मानवः ॥"
मत्स्यसूक्ते ।
"ताम्रलिङ्गं कलौ नार्च्चेत् रैत्यस्य सीसकस्य च
रक्तचन्दनलिङ्गञ्च शङ्खकांस्यायसं तथा ॥"*॥
मातृकाभेदतन्त्रे १२ पटले।
"पार्थिवे शिवपूजायां सर्व्वसिद्धियुतो भवेत्।
पाषाणे शिवपूजायां द्विगुणं फलमीरितम् ॥
स्वर्णलिङ्गे च पूजायां शत्रूणां नाशनं मतम्।
सर्व्वसिद्धीश्वरो रौप्ये फलं तस्माच्चतुर्गुणम् ॥
ताम्रे पुष्टिं विजानीयात् कांस्ये च धनसंचयः
गङ्गायाञ्च लक्षगुण लाक्षायां रोगवान् भवेत् ॥
स्फाटिके सर्व्वसिद्धिः स्यात्तथा मरकते प्रिये।
लौहलिङ्गे रिपोर्नाशं कामदं भस्मलिङ्गकम् ॥
वालुकायां काम्यसिद्धिर्गोमये रिपुहिंसनम्।
सर्व्वलिङ्गस्य माहात्म्यं धर्म्मकामार्थमोक्षदम्
संस्कारेण विना देवि पाषाणादौ न पूजयेत् ॥"
तत्संस्कारस्तत्रैव यथा,—
"रौप्यञ्च स्वर्णलिङ्गञ्च स्वर्णपात्रे निधाय च।
तस्मादुत्तोल्य तल्लिङ्गं दुग्धमध्ये दिनत्रयम् ॥
त्र्यम्बकेण स्नापयित्वा कालरुद्रं प्रपूजयेत्।
षोडशेनोपचारेण वैद्यान्तु पार्व्वतीं यजेत् ॥
तस्मादुत्तोल्य तल्लिङ्गं गङ्गातोये दिनत्रयम्।
ततो वेदोक्तविधिना संस्कारमाचरेत् सुधीः ॥"
लक्षणहीनलिङ्गपूजने दोषो यथा,—
"लिङ्गं सुलक्षणं कुर्य्यात् त्यजेल्लिङ्गमलक्षणम्।
दैर्घ्यहीने भवेद्व्याधिरधिके शत्रुवर्द्धनम् ॥
मानहीने विनाशः स्यादधिके च शिशुक्षयः।
विस्तारे चाधिके हीने राष्ट्रनाशो भवेत् ध्रुवम् ॥
पीठहीने तु दारिद्र्यं शिरोहीने कुलक्षयः।
ब्रह्मसूत्रविहीने च राज्ञां राष्ट्रञ्च नश्यति।
तस्मात् सर्व्वप्रयत्नेन लिङ्गं कुर्य्यात् सुलक्षणम् ॥"
अथ लिङ्गप्रमाणम्।
देव्युवाच।
"लिङ्गप्रमाणं देवेश कथयस्व मयि प्रभो।
पार्थिवे च शिलादौ च विशेषो यत्र यद्भवेत् ॥
श्रीशिव उवाच।
मृत्तिकातोलकं ग्राह्यमथवा तोलकद्वयम्।
एतदन्यन्न कुर्व्वीत कदाचिदपि पार्व्वति ! ॥"
इति मातृकाभेदतन्त्रे ७ पटलः ॥
अपि च।
"मृत्तिकातोलकं ग्राह्यमथवा तोलकद्वयम्।
वितस्तस्य प्रमाणेन घटनं कारयेद्बुधः।
अङ्गुष्ठपर्व्वमानन्तु कृत्वा लिङ्गं प्रपूजयेत् ॥"
इति षट्कर्म्मदीपिकाधृतविश्वसारतन्त्रम् ॥*॥
वितस्तीकरणमुक्तं कालोत्तरे।
"लिङ्गे वेद्यां तथा पीठे समसूत्रनिपातनात्।
समस्यैव विजानीयात् वितस्तीकरणन्त्विदम् ॥"
मृत्तिकाभेदेन ब्राह्मणादीनां पूजाफलस्य प्रशस्तत्वमुक्तं तत्रैव।
"शुक्लं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत्।
स एव परमेशानि त्रिवर्गफलभाग्भवेत् ॥
क्षत्त्रियस्तु वरारोहे रक्तं निर्म्माय पार्थिवम्।
पूजयेत् सततं यस्तु त्रिवर्गफलभाग्भवेत् ॥
हरितं पार्थिवं देवि निर्म्माय यस्तु पूजयेत्।
स च वैश्यो महेशानि त्रिवर्गफलभाग्भवेत् ॥
कृष्णं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत्
स शूद्रः परमेशानि त्रिवर्गफलभाग्भवेत् ॥
शिलादौ च महेशानि स्थूलञ्च फलदायकम्।
अङ्गुष्ठमानं देवेशि यद्वा हेमाद्रिमानकम् ॥
क्रमेण देवदेवेशि फलं बहुविधं लभेत्।
स्थूलात् स्थूलतरं लिङ्गं रुद्राक्षं परमेश्वरि।
पूजनाङ्कारणाद्देवि फलं बहुविधं स्मृतम् ॥"
स्थूलात् स्थूलतरमिति पार्थिवलिङ्गेतरपरम्।
मृत्तिकातोलकं ग्राह्यमित्यादिवचनात् ॥ * ॥
शिलास्फाटिकमरकतादीनां पञ्चसूत्रीकरणमुक्तम्। यथा,—
"शिवलिङ्गस्य यन्मानं तन्मानं दक्षसव्ययोः।
योन्यग्रमपि यन्मानं तदधोऽपि तथा भवेत् ॥"
इति लैङ्गम् ॥
"लिङ्गस्य यादृग्विस्तारः परिणाहोऽपि तादृशः
लिङ्गस्य द्विगुणा वेदी योनिस्तदर्द्धसम्मिता ॥
कुर्व्वीताङ्गुष्ठतो ह्रस्वं न कदाचिदपि क्वचित्।
रत्नादिशिवनिर्म्माणे मानमिच्छावशाद्भवेत् ॥"
इति तन्त्रान्तरम् ॥
लिङ्गशब्दव्युत्पत्तिर्यथा,—
"आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका।
आलयः सर्व्वदेवानां लयनाल्लिङ्गमुच्यते ॥"
इति स्कन्दपुराणम् ॥*॥
लिङ्गमहिमा यथा,—
शिव उवाच।
"न तुष्याम्यर्च्चितोऽर्च्चायां पुष्पधूपनिवेदनैः।
लिङ्गेऽर्च्चितं तथात्यर्थं परं तुष्यामि पार्व्वति ॥
एष देवि पुरा कल्पे जातोऽहं सर्व्वदैवतैः ॥
लिङ्गत्वाल्लिङ्गमित्युक्तं सदेवासुरकिन्नरैः ॥
प्रयच्छामि दिवं देवि यो मल्लिङ्गार्च्चने रतः।
त्यक्त्वा सर्व्वाणि पापानि निर्गतो दग्धकल्मषः।
मन्मना मन्नमस्कारी मामेव प्रतिपद्यते ॥"
इति वीरमित्रोदयधृतस्कन्दपुराणम् ॥*॥
द्रव्यविशेषेण पूजादिफलमपि तत्रैव।
"वस्त्रपूतजलैर्लिङ्गं स्नापयित्वा मम मानवाः।
लक्षाणामश्वमेधानां फलमाप्नोति सत्तमः ॥
सुगन्धिचन्दनरसैर्लिङ्गमालिप्य भक्तितः।
आलिप्यते सुरस्त्रीभिः सुगन्धैर्यक्षकर्द्दमैः ॥"*॥
लिङ्गपूजनाकरणे दोषस्तत्पूजाफलञ्च तत्रैव शिवनारदसंवादे ।
"विना लिङ्गार्च्चनं यस्य कालो गच्छति नित्यशः।
महाहानिर्भवेत्तस्य दुर्गतस्य दुरात्मनः ॥
एकतः सर्व्वदानानि व्रतानि विविधानि च।
तीर्थानि नियमा यज्ञा लिङ्गाराधनमेकतः ॥
न लिङ्गाराधनादन्यत् पुरा वेदे चतुर्ष्वपि।
विद्यते सर्व्वशास्त्राणामेष एव सुनिश्चितः ॥
भुक्तिमुक्तिप्रदं लिङ्गं विविधापन्निवारणम्।
पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात् ॥
सर्व्वमन्यत् परित्यज्य क्रियाजालमशेषतः।
भक्त्या परमया विद्वान् लिङ्गमेकं प्रपूजयेत् ॥"
इति स्कन्दपुराणम् ॥*॥
"अश्वमेधसहस्राणि वाजपेयशतानि च।
महेशार्च्चनपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥"
इति मत्स्यसूक्ते १६ पटलः ॥*॥
"स्वयं नारायणः प्रोक्तो यदि शम्भुं प्रपूजयेत्।
स्वर्गे मर्त्ये च पाताले ये देवाः संस्थिताः सदा।
तेषां पूजा भवेद्देवि शम्भुनाथस्य पूजनात् ॥"
इति मातृकाभेदतन्त्रम् ॥*॥
षट्कर्म्मदीपिकायाम्।
"असारे खलु संसारे सारमेतच्चतुष्टयम्।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भुसेवनम् ॥*॥
अथ पारदशिवलिङ्गमाहात्म्यम्।
"ज्योतिर्म्मयं महालिङ्गं कैलासनगरे प्रिये।
तस्यैव षोड़शांशेकः काश्यां विश्वेश्वरः स्थितः ॥
पूर्णलिङ्गं महेशानि शिवबीजं न चान्यथा।
शिलामध्ये यथा चक्रं लक्ष्मीनारायणः परम् ॥
पारदस्य शतांशेको लक्ष्मीनारायणो न हि।
पकारं विष्णुरूपञ्च आकारं कालिका स्वयम् ॥
रेफं शिवं दकारञ्च ब्रह्मरूपं न चान्यथा।
पारदं परमेशानि ब्रह्मविष्णुशिवात्मकम्।
यो यजेत् पारदं लिङ्गं स एव शम्भुरव्ययः ॥"
इति मातृकाभेदतन्त्रे ८ पटलः ॥
तस्य निर्म्माणविधानं पारदशब्दे द्रष्टव्यम् ॥*॥
प्रकारान्तरशिवलिङ्गोत्पत्तिर्यथा—
"ततो विवाहं निर्व्वर्त्त्य कृतकृत्या यथागताः।
गताः सर्व्वे महेशोऽपि सत्या सह तदा गृहम्।
जगाम रेमे सत्या च चिरं निर्भरमानसः ॥
अथ काले कदाचित्तु सत्या सह महेश्वरः।
रेमे न शेके तं सोढुं सती श्रान्ताभवत्तदा।
उवाच दीनया वाचा देवदेवं जगद्गुरुम् ॥
भगवन् हि शक्नोमि तव भारं सुदुःसहम्।
क्षमस्व मां महादेव कृपां कुरु जगत्पते ॥
निशम्य वचनं तस्या भगवान् वृषभध्वजः।
निर्भरं रमणं चक्रे गाढ़ं निर्द्दयमानसः ॥